
# ||ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ ||



Tracking:

| Sr | Date | Remarks | BY |
|---|---|---|---|
| 1 | | **Typing Started on** | **H K SRINIVASA RAO** |
| 2 | | **Typing Ended on** | **H K SRINIVASA RAO** |
| 3 | | **First Proof Reading** | **H K SRINIVASA RAO** |
| 4 | | | |
| 5 | | | |

# || ಶ್ರೀ ಹಯವದನ ರಂಗವಿಟ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ||

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ-ಜ್ಞಾನ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ – ಪಿತೃದೇವೋ ಭವ-ಆಚಾರ್ಯದೇವೋ ಭವ"

# हरिभक्तिलता

रमारमणमानम्य क्रमान्नत्वा गुरूनपि।
करोमि वादिराजोऽहं हरेस्सुगुणदर्पणम्॥ 1 ॥

हरिभक्तिलतामेतां तुरङ्गवदनप्रियाम् ।
करोति वादिराजेन्द्रः सतां मुक्तिफलाप्तये॥ 2 ॥

कर्मणा वर्धते यो न न कनीयांश्च कर्मणा ।
निरनिष्टः स नः पातु निरवद्यो हयाननः॥ 3 ॥

अखर्वसर्वदुर्वादि गर्वनिर्वापणो हरिः ।
कुर्वीतोर्वीं श्रियं शर्वपूर्वगीर्वाणराण्मम॥ 4 ॥

ये जङ्गमाङ्घ्रितोयेन शिवलिङ्गं दिने दिने ।
मज्जयन्ति तदुच्छिष्टं अभोज्यं भोजयन्ति च॥ 5 ॥

शैवं लिङ्गं मेहनादौ ये गले धारयन्ति च ।
न मानयन्ति ये पुण्यस्थले पूज्यतया स्थितम्॥ 6 ॥

शिवस्य लिङ्गमेवाहो नार्चयन्त्यवजानते ।
इत्थं शिवस्य शैवास्ते नीचादपि च नीचताम्॥ 7 ॥

अङ्गीकृत्य स्वरीत्यैव पुनस्तस्याखिलेशताम् ।
कथं ब्रूयुः सभामध्ये वदन्तु प्रतिवादिनः ॥ 8 ॥

शिवस्योच्छिष्टदानेन किं दोषोऽस्ति न विद्यते ।
इति प्रश्नस्योत्तरं ते वदन्तु प्रतिवादिनः ॥ 9 ॥

दोषोऽस्तीचेत् स्वयं दोषी न चेत् स्वोच्छिष्टदायकः ।
अन्योऽपि दोषवान् न स्यात् वदन्तु प्रतिवादिनः ॥ 10 ॥

यत् स्पृष्ट्वाक्षालयेद्धस्तं यच्च काकशुनोः प्रियम् ।
तदुच्छिष्टं शिवोऽद्यात्किं वदन्तु प्रतिवादिनः ॥ 11 ॥

अशुद्धमखिलस्यापि यदशुद्धं तदीशिशुः ।
शूद्रोच्छिष्टं अथं शुद्धं वदन्तु प्रतिवादिनः ॥ 12 ॥

गृहाणि परितो वह्निः दहन्यदि निजं गृहम् ।
न दहेत् तर्हि शैवानां प्रक्रिया स्यान्न चेन्न च ॥ 13 ॥

अमेध्यमन्यगेहेषु यदा शुद्धं निजे गृहे ।
शुद्धं स्यात्तर्हि शैवानां प्रकिया स्यान्न चेन्न च ॥ 14 ॥

बन्दीकुर्यात् इयं सर्वान् प्रतिबन्दी दुरत्यया ।
अस्याः कः परिहारः स्यात् वदन्तु प्रतिवादिनः ॥ 15 ॥

**स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहन्तुमुग्रं।**
**मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मिन्नि वपन्तु सेनाः॥**

रुद्रसूक्तगता सेयं वाणी रुद्राश्रयं हरिम् ।
यद्वक्ति तत्समः कः स्यात् वदन्तु प्रतिवादिनः ॥ 17 ॥

जरित्रे ते स्तुतिं कर्त्रे मह्यं हे मृड रक्षक।
जरिता गरितेत्युक्तेः मृड रक्षण इत्यपि ॥ 18 ॥

धातोः ख्यातोऽयमर्थो मे न कपोलेन कल्पितः ।
ईदृग्गुणान्वितोऽपि त्वं रुद्र कर्तसदं तव ॥ 19 ॥

हृदयाख्यगुहामध्ये सदा साक्षितया स्थितम् ।
युवानं षोडशवयस्कं च नित्यं जरोज्झितम् ॥ 20 ॥

मृगं न सिंहवद्भीमं द्विषज्जनभयङ्करम् ।
उपमार्थं च नेत्यतत्पदं आहुर्हि वैदिकाः ॥ 21 ॥

स्वभक्तोपद्रवकरं हिरण्यकशिपुं रिपुम् ।
हन्तुं हननशीलं चाप्युग्रं स्वाश्रितवैरिणाम्॥ 22 ॥

प्राचार्यं इत्यादि वाक्येषु उपसर्गोऽपि केवलम् ।
स्वयोग्यधातोरर्थं च वदेदित्याह पाणिनिः॥ 23 ॥

तदपेत्युपसर्गोऽपि ह्युपद्रवकृतं वदेत् ।
ईदृशं नरसिंहाख्यं मेषरूपधरस्य ते॥ 24 ॥

रक्षणादक्षतबलं गौरीसौभाग्यदायकम् ।
सदा स्तुहि महात्मानं न विस्मर कदाचन॥ 25 ॥

योऽहं हरेः स्तुतिकृतं त्वां वैष्णवधुरन्धरम् ।
स्तुवानोऽस्म्यस्मदस्मत्तो योऽन्यस्तं निवपन्तु ते॥ 26 ॥

सेना भूतपिशाचाद्याः सर्वलोकभयङ्कराः ।
न तु मा आश्रितं भक्तं नाशयन्तु कदाचन॥ 27 ॥

वपिर्धातुर्मर्दनार्थो वपनं नाश एव हि ।
यद्वा ईदृशं नृसिंहं ते भयहर्तारमीश्वरम्॥ 28 ॥

त्वद्वत् स्तवानो यो लोके मर्त्यस्त्वच्छिक्षयाऽन्वहम् ।
अस्मदस्माद्धरेर्भक्तादन्यं मायाविनं जनम्॥ 29 ॥

ते सेना भयदा नृणां निवपन्तु हरिद्विषम् ।
नतु विष्णोः प्रियं भक्तमितिवागाह वैदिकी॥ 30 ॥

इत्थं रुद्रस्य सूक्तस्था श्रुतिरेषा स्तुहीति या ।
लोटाऽनुशास्ति रुद्रोऽसौ कथं सर्वेश्वरो वद॥ 31 ॥

रुद्रस्तुत्यतया तस्य हृदि स्थिततया च यम् ।
सेयं जगौ नृसिंहं तं सदा सर्वेश्वरं वद॥ 32 ॥

अनाशङ्कितदोषत्वात् श्रुतिरेषापुरातनी ।
बलं येषां हि विदुषां तेषामग्रे तुषोपमम्॥ 33 ॥

किं कुर्यात् पौरुषं वाक्यं वदन्तु प्रतिवादिनः ।
विरोधेत्वनपेक्षं स्यात् असतिह्यनुमापकम्॥ 34 ॥

इत्याह जैमिनिः साक्षात् व्यासशिष्यो महामतिः ।
अपौरुषेयवेदस्य विरोधे पौरुषं वचः॥ 35 ॥

अनपेक्षं अमानं स्यात्तदभावे तु तद्वचः ।
स्वमूलभूतवेदस्य स्यात्किल ह्यनुमापकम् ॥ 36 ॥

तदानुकूल्यबलतः स्वयं मानं न चेन्न च ।
ईदृशं पौरुषं वाक्यं वेदोक्तार्थस्य बाधकम् ॥ 37 ॥

तदा स्यात् यदि हर्यक्षसदृशः स्यात् मृगीशिशुः ।
अतोऽस्मदग्रे को वक्ता वदन्तु प्रतिवादिनः ॥ 38 ॥

अतोऽस्मदग्रे को वक्ता वदन्तु प्रतिवादिनः ॥ 39 ॥

कु॒मा॒र॑श्चित् पि॒तर॒ं वन्द॑मान॒ं प्रति॑नानाम रुद्रो उ॒पयन्त॑म् ।
भू॒रे॑र्दा॒तार॒ं सत्प॑तिं गृणीषे स्तु॒तस्त्वं भे॒ष॒जा रा॑स्य॒स्मे ॥

इयं च रुद्रसूक्तस्था श्रुतिः गौरीपतिं हरेः ।
साक्षात्कुमारं स्तोतारं नमस्कर्तारमाह च ॥ 40 ॥

कृष्णं तत्पितरं स्तुत्यं नम्यं च स्मष्टमाह हि ।
ईदृक् रुद्रः क्व कृष्णः क्व वदन्तु प्रतिवादिनः ॥ 41 ॥

हे रुद्र पितरं कृष्णं कैलासं प्रति तर्हिचित् ।
उपयन्तं उपायान्तं वन्दमानं च लीलया ॥ 42 ॥

उपागमनमप्यस्य लीलैव न तु वस्तुतः ।
इति सूचयितुं चात्राकारं श्रुतिरगूहयत्॥ 43 ॥

कुमारश्चित् तस्य हरेः पुत्र एव भवान्यतः ।
न तूपचारतः पुत्रो वसुदेवकुमारवत्॥ 44 ॥

ततः पापेन चकितः प्रतिनानाम तं प्रभुम् ।
भूरेः मोक्षस्य दातारं सत्पतिं च सतां पतिम्॥ 45 ॥

गृणीषे वैष्णवैः सूक्तैः विष्णोर्नु इत्यादिकैः शुभैः ।
आत्मार्थकप्रत्ययान्तपदेन हरिणा कृतम्॥ 46 ॥

वन्दनं तव ह्रन्निष्टमात्मानं प्रति तेन तु ।
इति सूचयितुं शानच् प्रत्ययान्तपदं ददौ॥ 47 ॥

यस्त्वं गुहाशयायैवेत्यात्थ तत्ते वचः स्मर ।
परस्मै पुरुषायैव नमनं शम्भुना कृतम्॥ 48 ॥

इति सूचयितुं रुद्रे परस्मैपदमाह च ।
यतः सर्वगुहाशाय्यप्येष कृष्णः सनातनः॥ 49 ॥

तत् त्वत्कृतं तु नमनं कृष्णमेति न चापरम् ।
गुहाशयस्य ह्यस्यान्यो यतो नास्ति गुहाशयः ॥ 50 ॥

तत् परस्मैपदं चैनं परमाह न चापरम् ।
भक्त्याध्यतिशयो ह्यस्मिन्नस्तीति द्योतनाय सा ॥ 51 ॥

दीर्घयामास नमनं दीर्घेणेति मतिर्मम ।
अतः कैलासयात्रापि न श्रोतृसुखदा द्विषाम् ॥ 52 ॥

स्तुतो भक्तजनेन त्वं अस्मेऽस्मै स्तावकाय च ।
भेषजा ङेषजान्यौषधान्यज्ञानाख्यहृद्रुजाम् ॥ 53 ॥

नाशनायेश सज्ञानाख्यानि रासि ददासि च ।
रा दान इति धात्वर्थमपि चाह स पाणिनिः ॥ 54 ॥

क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम् ।
आवां तवाङ्गसम्भूतौ अतः केशवनामवान् ॥ (हरिवंश भ.प 88-48)

भेषजेतिपदं लुप्तविभक्तिकमिदं यतः ।
तद्भेषजा भेषजानीत्यर्थमाह स पाणिनिः ॥ 55 ॥

एवं च शम्भुर्ज्ञानस्य दाताऽऽसीद्गुरुरेव नः ।
कृष्णस्य च कुमारोऽभून्नन्ता स्तोता च सत्पतेः ॥ 56 ॥

रुद्रस्य च पिता तेन प्रणतः संस्तुतः प्रभुः ।
कृष्णश्च श्रुतिसम्मत्या यतोऽभूत्परदेवता ॥ 57 ॥

तस्माद्गुरुं वद हरं हरिभक्तिधुरन्धरम् ।
हरस्य साक्षात्पितरं परं दैवं हरिं वद ॥ 58 ॥

स्मर जैमिनिना प्रोक्तं सूत्रमुक्तार्थसूचकम् ।
द्वैमातुरश्रुतेरर्थे कोऽन्तरायं करिष्यति ॥ 59 ॥

अतोस्मदग्रे कः स्थाता वदन्तु प्रतिवादिनः ।
अनाशङ्कितदोषत्वात् श्रुतिरेषा पुरातनी ॥ 60 ॥

बलं येषां हि विदुषां तेषामग्रे तुषोपमं।
किं कुर्यात्पौरुषं वाक्यं वदन्तु प्रतिवादिनः ॥ 61 ॥

तव श्रिये मरुतो मर्जनयन्त रुद्र यत्ते जनिम चारु चित्रं।
पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम
गोनाम् ॥ 62 ॥

इति श्रुतिर्मुकुन्दस्य पादतीर्थनिषेवणात् ।
शम्भोः पवित्रतामाह जन्म चाह प्रजापतेः ॥ 63 ॥

सदा विष्णुपदध्यातृत्वं च तन्नामजघृताम् ।
आह श्रियं च विष्ण्वङ्घ्रितीर्थनित्यनिषेवणम्॥ 64 ॥

इत ईदृग्विधः शम्भुर्मनोवाक्कायकर्मभिः ।
भक्तिं दधानः सततं विष्णौ परमपाने॥ 65 ॥

तत्पुत्रब्रह्मणः पुत्रः कथं तदस्याऽऽश्रयो भवेत्।
श्रुतिश्च वैष्णवाचारधनकोशोपमाऽभवत्॥ 66 ॥

यतः शिवस्यापि धर्मं वक्ति तीर्थनिषेवणम् ।
अतोऽस्मदग्रे को वक्ता वदन्तु प्रतिवादिनः॥ 67 ॥

हे रुद्र यद्येभ्यस्तेऽभूत्पूर्वं जनिम जन्म वै ।
तव श्रियै ते मरुतः पितरः पुत्रलालसाः॥ 68 ॥

चित्रं स्थूलाणुरूपत्वात् चारु सौन्दर्यवत्वतः ।
उप यस्य समीपे मा रमाऽऽस्ते परिचारिका॥ 69 ॥

यदित्थं भाग्यसम्पन्नपदं विष्णोरनुत्तमम् ।
त्रिविक्रमतनोस्तद्धि मज्जयन्ति पुरा किल॥ 70 ॥

वैदिकत्वादमाङ्ग योगेऽप्यल्लोपं वक्ति पाणिनिः ।
न लोकमोहनायेदं पादप्रक्षालनं कृतम्॥ 71 ॥

किन्तु भक्तैवेति वक्तुं प्रायुङ्क्तालौकिकं पदम् ।
श्रीश्च बन्धकरी मुक्तिप्रतिबन्धकरी तु या॥ 72 ॥

साऽत्रनाभिमता किन्तु यत्पापं जायते सदा ।
श्मशानवासतो भस्मनृकपालस्थिधारणात्॥ 73 ॥

मस्तके तीर्थपादस्य विष्णोः पादोदसेवया ।
तस्यांहसः परीहाररूपा श्रीरुच्यते बुधैः॥ 74 ॥

इति तत्वं द्योतयितुं श्रिय इत्यवदच्छ्रुतिः ।
पादप्रक्षालनं शम्भोः श्रीरेषाऽभून्न सम्पदा॥ 75 ॥

दिगम्बरो यो जटिलस्तस्य श्रीरियमेव हि ।
शिवश्रियवोऽभूदित्याह यतो भागवते शुकः॥ 76 ॥

'यच्छौचनिः सृतसरित्प्रदरोदकेन
तीर्थेन मूर्ध्न्यधिधृतेन शिवश्शिवोभूत्' (भागवत)

ततः पवित्रतैवास्य शिवस्य श्रीः सतां मता ।
स्त्रीपुंयोगाज्जनिर्नेयं किन्तु भ्रूमध्यतो विधेः॥ 77 ॥

इति सूचयितुं चात्र विश्लिष्टमकरोत्पदम् ।
इत्थं महोपकारित्वात् पदमेतत्सदा हृदि॥ 78 ॥

त्वया न्यथायि येनेदं पदं ध्यायसि मानसे ।
निधायीति पदं चेदं न्यधायीत्याह पूर्ववत्॥ 79 ॥

निषेधस्मारकोऽवर्णो हरेण परमादरात् ।
कृते ध्याने कुतो वाच्य इति तत्याज तं च वाक्॥ 80 ॥

तेन गोनां गवां नाम्नां मध्ये तं च निरन्तरम्।
गुह्यं रामाभिदं नाम पासि रक्षसि जिह्वया॥ 81 ॥

सदैवोच्चारणं नाम्नां रक्षणं नापरं विदुः ।
मनसाग्रे सङ्कल्पयति वाचा व्याहरत्यथ॥ 82 ॥

इति श्रुतेरियं नामनदी जिह्वाङ्गणे तव ।
नृत्यन्ती चित्तगं ध्यानमप्यूचे करपल्लवात्॥ 83 ॥

कल्पे कल्पे यतः सत्यलोकाधिपतयोऽखिलाः ।
ब्रह्माणो हरिपादाब्जं क्षालयन्ति ततः श्रुतिः॥ 84 ॥

मरुतस्त्विति बह्वर्थविभक्त्या वक्ति तान्सुरान् ।
अतश्च काकतालीयं नेदं पादोद्धारणम्॥ 85 ॥

किन्तु भूयो दर्शनेन व्याप्तं शैवे पदेऽभवत् ।
इत्यर्थो दृश्यते स्पष्टमस्यामृचि यतोऽखिलैः ॥ 86 ॥

एवं च मनसा वाचा कर्मणा च दिने दिने ।
यस्य दास्यं महादेवो बिभर्ति परमादरात्॥ 87 ॥

स एष भगवान्विष्णुर्न किं सर्वोत्तमो वद।
प्रतिकल्पं विधातारो यत्पदं क्षालयन्ति हि ॥ 88 ॥

स ब्रह्मपूज्यचरणो न किं सर्वोत्तमो वद ।
अनाशङ्कितदोषत्वात् श्रुतिरेषा पुरातनी ॥ 89 ॥

बलं येषां हि विदुषां तेषामग्रे तुषोपमम् ।
किं कुर्यात्पौरुषं वाक्यं वदन्तु प्रतिवादिनः ॥ 90 ॥

अत्रापि जैमिनिः साक्षी कर्मब्रह्मविदग्रणीः ।
इतोऽपि नः कुतो भीतिर्वदन्तु प्रतिवादिनः ॥ 91 ॥

शिवत्रिनेत्रोपमं मे नेत्रमासीच्छ्रुतित्रयं ।
त्रिनेत्रं प्रति को वक्ता वदन्तु प्रतिवादिनाः ॥ 92 ॥

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद ॥ 93 ॥

इति श्रुतिश्चतुर्मुखस्याप्यगम्यं हरिं जगौ ।
अतः सर्वोत्तमस्यास्य समोऽन्योस्तीति को वदेत् ॥ 94 ॥

यदि सृष्टिरियं सर्वा सर्वज्ञेन महात्मना ।
कृतेति कथ्यते प्राज्ञैः न तु स्वस्यैव कर्मणा ॥ 95 ॥

तर्हि सर्वस्य कर्ता वा धर्ता वा यः परः प्रभुः ।
संहर्ता वा लये प्राप्ते तमिमं पुरुषोत्तमम् ॥ 96 ॥

योऽस्य सर्वस्य जगतोऽप्यध्यक्षो देवताग्रणिः ।
शयानस्य हरेः नाभिपद्मस्थस्तनमुखाम्बुजात् ॥ 97 ॥

शृण्वंश्च सकलान् वेदान् ब्रह्म सोऽपि स्वहृद्गते ।
परमे व्योम्नि सततं वसन्तं वेद वा प्रभुम् ॥ 98 ॥

न वेद वा महात्मानमिति स्तौति हरिं श्रुतिः ।
इयं हि सृष्टिर्यत आबभूवेत्येतदर्थिका ॥ 99 ॥

ऋगियं वैदिकैः सर्वैः पठ्यते पितृकर्मणि ।
सान्तं वेत्तमशक्यत्वात् न वेदेत्याशयः श्रुतेः ॥ 100 ॥

नृशृङ्गवदवेद्यत्वाभावाद्वेदेति चाशयः ।
एवं च चतुरो वेदान् यश्चतुर्भिर्मुखैः जगौ ॥ 101 ॥

ईदृग् ब्रह्मागम्य हरेः समोऽन्योऽस्तीति को वदेत् ।
अनाशङ्कितदोषत्वाच्छ्रुतिरेषा पुरातनी ॥ 102 ॥

बलं येषां हि विदुषां तेषामग्रे तुषोपमम् ।
किं कुर्यात्पौरुषं वाक्यं वदन्तु प्रतिवादिनः ॥ 103 ॥

**उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्च नैनोः ।**
**इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वितदैरयेथाम् ॥ 104 ॥**

विष्णु सूक्तगता सेयं वाणी स्तौति रमापतिम् ।
उभा उभौ युवामिन्द्रो विष्णुः सर्वं विजिग्यथुः ॥ 105 ॥

छान्दसत्वात् क्वचिल्लोपः क्वचिद्भवति चागमः ।
आविष्टांशो बहिष्टांश इति रूपद्वयान्वितः ॥ 106 ॥

विष्णौ पदद्वयेनात्र कथ्यते न पुरन्दरः ।
न जिगाय बलिं योऽसौ पराजिग्ये बलेर्बलात् ॥ 107 ॥

तस्येन्द्रस्य कथां विष्णुसूक्ते कः कथयेत् बुधः ।
एतयोः समतासिद्ध्यै श्रुतिरिन्द्रं पुरा जगौ ॥ 108 ॥

युवयोरेतयोरेनोः कतरस्त्वेक एव च ।
कुतोऽपि न पराजिग्ये यद्युवां लीलया मिथः ॥ 109 ॥

अपस्पृधेथां स्पर्धां च चक्राथे च स्थळे स्थळे ।
अत्रापेत्यपसर्गेण स्पर्धां धिक्कुरुते श्रुतिः ॥ 110 ॥

तत्तेन हेतुना त्रेधागतियोग्यस्वभावतः ।
स्थितत्रिविधजीवानां सहस्रपदसूचितान् ॥ 111 ॥

गणाननन्तां त्रिविधान् अन्ते त्रेधा फलाप्तये ।
हृदि प्रविश्य तद्बुद्धिं विशब्दोक्तविभागतः ॥ 112 ॥

त्रेधा त्रेधैवेरयेथां प्रेरयेतां युवामपि ।
एकस्यैव त्रिवारं च यद्दत्तं प्रेमतो नृभिः ॥ 113 ॥

अन्नं सुवर्णं वस्त्रं वा तथा नेदं त्रिधा फलम्।
किन्तूत्तमस्य मुक्त्याख्यसुखरूपमहाफलम् ॥ 114 ॥

मध्यमे मध्यमफलं अधमे दुःखमेव च ।
इत्थं फलविशेषं च स्पष्टं सूचयितुं श्रुतिः ॥ 115 ॥

विशेषार्थं वदन्तं वीत्युपसर्गमुपाददे ।
लीलेति बुद्धिं दिशतं सतां मुक्तिफलार्थिनाम् ॥ 116 ॥

द्विषां द्वेषयुतावेतौ इत्यसत्सु च दुर्मतिम् ।
तेषामन्ते तमो दातुं तथा मिश्रस्वरूपिणाम् ॥ 117 ॥

सतां योगे तद्वदेव सुमतिं दिशतं युवाम् ।
खलैर्योगे तु खलवत् कुमति दिशतं युवाम् ॥ 118 ॥

सुखदुःखावाप्तिरूपमिश्रतद्गतिसिद्धये ।
इति विष्णोः सूक्तगता वाणी सर्वत्र तं हरिम् ॥ 119 ॥

यस्माज्जयिनमेवाह न पराजयिनं क्वचित् ।
इत्थं महासमर्थस्य हरेः कोऽस्य समो वद ॥ 120 ॥

युयुत्सतां कुत्रचिदाततायिनां जयस्सदैकत्र न वै पराजयः ।
निनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं पुरातनम् ॥ 121 ॥

इति भागवते वाक्यं श्रुतेरर्थं प्रशंसति ।
अतोऽस्मदुक्तश्रुत्यर्थे कथं शङ्का भवेद्वद ॥ 122 ॥

वेदापहार्यसुरतो ब्रह्मा पूर्वं पराजितः ।
तज्जयार्थं हयग्रीवं भक्त्या किं नाश्रितो वद ॥ 123 ॥

वृकासुरात्परा भूतो दिक्षु धावन्नुमापतिः ।
अशक्तस्तज्जयायान्ते विष्णुं किं नाश्रितो वद ॥ 124 ॥

स्वभक्षणायागताभ्यो योगिनीभ्यः पराजितः ।
अशक्तश्च जये तासां मेषवेषधरो हरः ॥ 125 ॥

तज्जयार्थं नारसिंहमन्ते किं नाश्रितो वद ।
असुरेभ्यः पराभूतैः सुरैरभ्यर्थितो हरिः ॥ 126 ॥

दशावतारान्देवार्थे कृष्णः किं नाकरोद्वद ।
एवं च सर्वजेतृत्वं हरेर्वान्यस्य वा वद ॥ 127 ॥

सर्वेभ्योप्यजितत्वं च हरेर्वान्यस्य वा वद ।
यस्माज्जयी चाजितश्च विष्णुरुक्तप्रकारतः ॥ 128 ॥

वाणी परमकल्याणी पौराणी तेन केशवम् ।
सत्करोति सुरानेतान् धिक्करोति न किं वद ॥ 129 ॥

बोधाय स्वविभक्तारं मानत्वस्य स्थिरीकृते ।
व्यासात्मनोपकर्तारं हयग्रीवादिरूपतः ॥ 130 ॥

युगे युगेऽवतीर्यात्र हर्तारं स्वापकारिणाम् ।
कर्तारं सर्वजगतां विहर्तारं पयोम्बुधौ ॥ 131 ॥

स्वाभिमानिश्रियश्चापि भर्तारं पुरुषोत्तमम् ।
स्वात्मनोपि लये प्राप्ते धर्तारं च पदे पदे ॥ 132 ॥

रक्षोहणं चासुरघ्नं जेतारमपराजितम् ।
किं नाहुर्विश्वतो वेदाः पक्षपातं विना वद ॥ 133 ॥

अनाशङ्किदोषत्वात् श्रुतिरेषा पुरातनी ।
बलं येषां तु विदुषां तेषामग्रे तुषोपमम्॥ 134॥

किं कुर्यात्पौरुषं वाक्यं वदन्तु प्रतिवादिनः ।
इति श्रुतिश्च सर्वस्य नियन्तारं रमापतिम्॥ 135॥

निषुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनां
न ऋते त्वत्क्रियते किञ्चनारे महामर्कं मघवं चित्रमर्च॥136॥

वक्ति तत्प्रेरणाभावे शक्तिः कस्यापि नेति तम् ।
गणस्येन्द्रियवर्गस्य पते रक्षक मापते॥ 137॥

गणेष्विन्द्रियवर्गेषु नितरां सुष्ठु सीद मे ।
गत्यर्थः सदितिर्धातुः स्थिरीभावं वदेदयम्॥ 138॥

अतो मदिन्द्रियेषु त्वं स्थित्वा सम्यक्प्रवर्तय ।
यतः कवीनां मध्ये त्वां विशेषेण मनीषिणः॥ 139॥

प्रकृष्टतममाहुर्हि ततस्त्वं नेत्सि मद्धितम् ।
केनचित् किञ्च नाप्यत्र कार्यं सर्वजनैरपि॥ 140॥

तृणस्य जालनं वाक्ष्णोरुन्मेषणनिमेषणे ।
त्वत्त्वत्तो न ऋते लोके तव प्रेरणया विना ॥ 141 ॥

दूरे वाऽथ समीपे वा क्रियते न किल प्रभो ।
अतो महान्तमा सम्यग् ज्ञानं कं च सुखं महत् ॥ 142 ॥

यस्य तस्मादर्कशब्दवाच्यमन्नपते प्रभो ।
त्वमेव त्वां चित्रमर्चं परतन्त्रे मयि स्थितः ॥ 143 ॥

मदिन्द्रियगणं सम्यक्प्रेरयित्वाऽर्चने तव ।
अर्चासन्निहितं त्वां च मम द्वाराऽर्चयानिशम् ॥ 144 ॥

इममर्थं बोधयन्ती श्रुतिः सर्वनियामकम् ।
प्रशंसति हरिं यस्मात्तस्मात्कोस्य समो वद ॥ 145 ॥

यत्प्रेरणं विना ब्रह्मादयोऽपि स्वीयशक्तितः ।
क्षुद्रं तृणस्योद्धरणमपि कर्तुं न शक्नुयुः ॥ 146 ॥

मासमर्थस्य तस्य समः कोऽन्यो भवेद्वद ।
अनाशङ्कितदोषत्वाच्छ्रुतिरेषा पुरातनी ॥ 147 ॥

बलं येषां हि विदुषां तेषामग्रे तुषोपमम् ।

किं कुर्यात्पौरुषं वाक्यं वदन्तु प्रतिवादिनः ॥ 148 ॥

अभी३ दमेकमेकोऽअस्मि निष्षाळभीद्वा किमुत्रयं करन्ति ।

खलेन पर्षान्प्रतिहन्मि भूरि किं मा निन्दन्ति

शत्रवोऽनिन्द्राः ॥149॥ ऋ-8-1-6

अभि इदं एकं एकः अस्मि निष्षाट् अभि द्वा किम् ऊँ इति

त्रयः करन्ति

खलै न पर्षान् प्रति हन्मि भूरिं किं मा निन्दन्ति शत्रवः

अनिन्द्राः ॥ ऋ-8-1-6 ॥

इतिस्पष्टश्रुतिरियं जेतारमपराजितं।

आहासुरारिं नृहरिं ततः कोऽस्य समो वद॥ 150 ॥

एकं जगदिदं द्वौ वा प्रपञ्चौ त्रय एव वा ।

मां प्रत्यायान्तु समरे नितरां शक्तिमत्वतः॥ 151 ॥

निष्फाळाख्योऽभिगन्तास्मि सोऽहमेकोऽपि तान्प्रति ।

अशक्तत्वात् अनिन्द्राख्याः शत्रवस्ते त्रयोऽपि माम्॥ 152 ॥

किं कुर्वन्ति अहमेवैतान् सर्वानपि च लीलया ।
पर्षान् तिलादिधान्यौघान् भूरि भूरींश्च तैलकृत्॥ 153 ॥

यथा खले चूर्णयति तथाहं प्रतिहन्मि च ।
अनिन्द्राः शत्रवस्त्वेते किं कुर्वन्ति त्रयोऽपि माम्॥ 154 ॥

इन्द्रं महैश्वर्यवन्तं महाबलपराक्रमम् ।
यस्मान्मुखोद्घाटनं च मद्वशं सर्वदेहिनाम्॥ 155 ॥

ततो दोषातिदूरं मां स्ववाचां च प्रवर्तकम् ।
जिह्वां चालयितुं चैवानिन्द्रा मे शत्रवस्त्विमे॥ 156 ॥

किं वा निन्दन्ति सुगुणपात्रीभूतं परात्परम् ।
इत्याह तस्य जेतात्र त्रिलोक्यामपि को वद॥ 157 ॥

हन्तुं शक्तः स सकलं किं न सर्वजयी वद।
ईदृशस्य जगत्यैक्यं साम्यं वा स्यात्कथं वद॥ 158 ॥

अनाशङ्कितदोषत्वात् श्रुतिरेषा पुरातनी ।
बलं येषां हि विदुषां तेषामग्रे तुषोपमम्॥ 159 ॥

किं कुर्यात् पौरुषं वाक्यं वदन्तु प्रतिवादिनः॥ 160 ॥

तमुपागतमालक्ष्य सर्वे सुरगणादयः ।
प्रणेमुः सहसोऽत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः ॥ 161 ॥

तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः ।
मूर्ध्नि कृताञ्जलिपुटा उपतस्थुरधोक्षजम् ॥ 162 ॥

इति भागवतोक्त्या ते ब्रह्मरुद्रादयः सुराः ।
विष्णुभक्तस्य दक्षस्य द्रोहाच्चकितचेतसः ।
तद्भासा हतभासश्च किं वाच्यमितिशङ्कया ॥ 163 ॥

मखान्तर्लीनजिह्वाश्च शुष्यद्वदनपङ्क्तयः ।
गृह्णीयाद्वा न गृह्णीयाद्वेति चित्तस्थसाध्वसात् ॥ 164 ॥

वेपमानाखिलाङ्गाश्च सहसोऽत्थाय सर्वशः ।
कृताञ्जलिपुटा मूर्ध्ना प्रणेमुः किल केशवम् ॥ 165 ॥

इमे समास्तस्य कथं वदन्तु प्रतिवादिनः ।
शरं धनुषि सन्धाय धूर्जटिर्जगदीश्वरः ॥ 166 ॥

भगवत्तेजसा गुप्तो ददाह त्रिपुरं नृप ।
इत्थं श्रीमद्भागवते यस्तु प्रस्तोयते हरिः ॥ 167 ॥

कस्तस्य समतामेति वदन्तु प्रतिवादिनः ।
शिवोऽपि भगवद्दत्तशक्त्यात्रिपुरवासिनः ॥ 168 ॥

अदहत्किल सङ्ग्रामे कः शक्तः तं प्रभुं विना ।
ब्रह्मा तदुपधार्याथ सह देवैः तया सह ॥ 169 ॥

जगाम सत्रिनयनः तीरं क्षीरपयोनिधेः ।
इति भागवतोक्त्या च ब्रह्मरुद्रादयः सुराः ॥ 170 ॥

शरणागतभूकार्यकरणे शक्तिवर्जिताः ।
धराकार्याय पुंसूक्तमन्त्रमुच्चार्य भक्तितः ॥ 171 ॥

यं भेजुः तत्समः कः स्यात् वदन्तु प्रतिवादिनः ।
ब्रह्मा भवश्च तत्रेत्य मुनिभिः नारदादिभिः ॥ 172 ॥

देवैः सानुचरैः सार्धं गीर्भिर्विष्णुमथास्तुवन् ।
य इत्थं गर्भसंस्थस्सन् शिशुर्ब्रह्मशिवादिभिः ॥ 173 ॥

स्तुत समस्तस्य कः स्याद्वदन्तु प्रतिवादिनः ।
यद्रोदीः सुरश्रेष्ठ सोद्वेग इव बालकः ॥ 174 ॥

ततस्त्वामभिधास्यन्ति नाम्ना रुद्र इति प्रजाः ।
तस्यापि दर्शयामास स्ववीर्यं कृतकल्मषः ॥ 175 ॥

यच्चकार गले नीलं तच्च साधोर्विभूषणम् ।
इति भागवते स्कन्धे तृतीये चाष्टमे वचः ॥ 176 ॥

द्वेधाप्यशक्ततामाह तस्य चार्थो विचार्यताम् ।
क्षीरालाभात् शिशुरिव स्थानादीनामलाभतः ॥ 177 ॥

यदरोदीत् स्वपितरं प्रतिरुद्रस्ततः किल ।
पितैव रुद्रनामानं चकार स्वसुतं हरम् ॥ 178 ॥

यतो गले नीलिमाख्यं कल्मषं सर्वसम्मतम् ।
गरोऽसौ गिरिशग्रीवे स्ववीर्याङ्कमथात् किल ॥ 179 ॥

रोदनाद्रुद्रनामा यो नीलग्रीवो विषोल्बणात् ।
स कालियविषश्वासरूषिते यमुनाह्रदे ॥ 180 ॥

तदाननसहस्रोग्रदंष्ट्राघातशतैरपि ।
नारोदीत् यो नापि रुग्णस्तथा पूतनिकास्तनम् ॥ 181 ॥

कालकूटविषालेपदूषितं यः पिबन् शिशुः ।
नारोदीत् न च रुग्णोऽभूत् तस्य शूली शिवः कथम्॥ 182 ॥

समतामेति कृष्णस्य वदन्तु प्रतिवादिनाः ।
सुमनसस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्टिपुरोगाः॥ 183 ॥

कवय आनतकन्धरगात्रा विस्मयं ययुरनिश्चिततत्वाः ।
इति भागवते वेणुगीता माहात्म्य वर्णनम्॥ 184 ॥

कुर्वाणे दशमस्कन्धे वाक्यमेतदुदीरितम् ।
येषां सर्वासु विद्यासु शोभनं च मनोऽस्ति हि॥ 185 ॥

अतः सर्वज्ञता चास्ति तेषां विख्यातकर्मणाम् ।
शर्वशक्रब्रह्मपूर्वगीर्वाणास्ते हरेः शिशोः॥ 186 ॥

तद्वेणुगीतकौशल्यमवतीर्णस्य भूतले ।
श्रोतुं कौतूहलयुताः कन्धरं गात्रमेव च॥ 187 ॥

नम्रीकृत्य स्वलोकादप्यधोबागे प्रदर्शितम् ।
श्रुत्वावधार्य मनसा स्वाज्ञातां पूर्वतातताम्॥ 188 ॥

निश्चित्य हरितत्वस्येयत्ता नास्त्वीति धीयुताः ।
महान्तं विस्मयं सर्वे ययुरित्याह वागियम्॥ 189॥

येऽस्ये सङ्गीतकौशल्यमपि नान्तं विजानते ।
ते देवाः सृष्टिसंहारस्थित्यादिषु च कौषलम्॥ 190॥

अनादिकालमारभ्यानन्तराक्षसशिक्षणे ।
समर्थवीर्यधैर्यादिकौशल्यं जगदीशितुः॥ 191॥

न जानन्तीति किं वाच्यमीदृशेन महात्मना ।
कः समो वा अधिको वा स्याद्वदन्तु प्रतिवादिनः॥ 192॥

यद्वेणुना शर्वशक्रपरमेष्ठिपुरोगमाः ।
कवयोऽप्यानता जाताः इत्याह भगवान् शुकः॥ 193॥

एवं च स्रष्टृता दूरे तिष्ठत्वस्मद्रमापतेः ।
गानेऽपि कः समोऽस्य स्याद्वदन्तु प्रतिवादिनः॥ 194॥

चतुर्मुखः पञ्चमुखः षण्मुखो द्विमुखोऽपि वा ।
सहस्रवदनो वा स्यादनेकैर्वदनैरपि॥ 195॥

शिशोः कृष्णस्यैकवक्रचित्रगानरसोपमम् ।
कः सङ्गीतरसं कुर्यात् वदन्तु प्रतिवादिनः ॥ 196 ॥

शापप्रसादयोरीशाः ब्रह्मविष्णुशिवादयः ।
सद्यश्शापप्रसादोऽङ्ग शिवो ब्रह्मा च नाच्युतः ॥ 197 ॥

इति भागवतोक्त्या च वरं दत्वैवमारकौ ।
कथं ब्रह्मशिवौ भक्तपालनैकधुरन्धरात् ॥ 198 ॥

विभीषणध्रुवादीनां आकल्पान्तपदप्रदात् ।
हरेनूनचरित्रौ न वदन्तु प्रतिवादिनः ॥ 199 ॥

देवासुरमनुष्येषु ये भजन्त्यशिवं शिवम् ।
प्रायस्ते धनिनो ब्रह्मन् न तु लक्ष्मीपतिं हरिम् ॥ 200 ॥

एतत् वेदितुमिच्छामि सन्देहोऽत्रमहान् हि नः ।
विरुद्धशीलयोः प्रभ्वोः विरुद्धाभजताङ्गतिः ॥ 201 ॥

इति भागवते राज्ञा पृष्टो वक्ति शुकः किल ।
हरिं गुणत्रयातीतं सर्वज्ञं सर्वसाक्षिणम् ॥ 202 ॥

नैर्गुण्याख्यविमुक्तेश्च दातारं भजतां सताम् ।
हरं तु त्रिगुणैर्बद्धं भजतामपि बन्धकम्॥ 203 ॥

यतोऽभूत् बन्धको रुद्रः सुराणामग्रणीरपि ।
हरिस्तु बन्धविधुरो बद्धानां मोचकोऽप्यबूत्॥ 204 ॥

ततोऽपि कः समो विष्णोः वदन्तु प्रतिवादिनः ।
शिवः शक्तियुतः शश्वत् त्रिलिङ्गो गुणसंवृतः॥ 205 ॥

व्यकारिकः तैजसश्च तामसश्च्येत्यहं त्रिधा ।
ततो विकारह्यभवन् षोडशीमीषु(वर्त्मसु) पञ्चसु॥ 206 ॥

उपाधावन्विभूतीनां सर्वासामश्नुते गतिम् ।
हरिस्तु निर्गुणः साक्षात् पुरुषः प्रकृतेः परः॥ 207 ॥

स सर्वदृक् उपद्रष्टा तं भजन् निर्गुणो भवेत् ।
याशक्नोत्यखिलान् बद्धुं प्रकृतिर्जडरूपिणी॥ 208 ॥

सा शक्तिर्बन्धिका शश्वत् तया बद्धः शिवः किल ।
अत एव रजस्सत्वतमोभिश्चित्तदूषकैः॥ 209 ॥

गुणैराच्छन्नसज्ञानस्वरूपत्वात् शिवं बुधाः ।
गुणसंवृत इत्याहुस्तामसादिप्रभेदतः ॥ 210 ॥

त्रिरूपाहङ्कारतत्वं कामलोभमदप्रदम् ।
यस्यासाधारणो धर्मः त्रिलिङ्गः स शिवः किल ॥ 211 ॥

यः क्रोधादच्छिन्नत् दक्षशिरः अलाभात् रुरोद च ।
मदान्धत्वात् स्वहस्तस्थदनुषा छिन्नमस्तकः ॥ 212 ॥

ईदृशस्य शिवस्य अहन्तत्ववत्तः उचितैव हि ।
ततो विकारहेतुत्वात् विकारा इति कीर्तिताः ॥ 213 ॥

एकादशेन्द्रियगणभूतपञ्चकरूपिणः ।
नानासम्पत्कराकाराः पदार्थाः किल षोडश ॥ 214 ॥

अब्रूवन् यः शिवं देवं उपाधावन् स पूरुषः ।
अमी च दुष्टसंसारवर्त्मसूत्पन्नमूर्तयः ॥ 215 ॥

नानाविभूतयो ज्ञेयाः तासां गतिमवाप्नुयात् ।
पदानां सम्पदैवेत्थं अर्थोऽभूद्धि विचारणे ॥ 216 ॥

किं नेदं हानिदं शम्भोः वदन्तु प्रतिवादिनः ।
अहङ्काराभिधे तत्वे तामसादिस्वरूपिणि ॥ 217 ॥

सदाऽभिमानवांस्तेन तामसश्च क्वचित् क्वचित् ।
क्वचिच्चः राजसः क्वापि नानारूपविकारवान् ॥ 218 ॥

अतः स्वाश्रितवर्गं च कुरुते स्वात्मवत्किल ।
प्रायस्ते धनिनश्चेति प्रश्नस्तस्मात्परीक्षितः ॥ 219 ॥

धनस्य तन्निमित्तस्य विकारस्य च सूचकः ।
तत ईदृक् शिवाज्जाता विकाराः किल षोडश ॥ 220 ॥

यतो विक्रियते लोकः स विकार इतीर्यते ।
आकाशवायुजं तूर्यं तेनापि धनिता नृणाम् ॥ 221 ॥

स्वर्णरत्नादिकं वस्तु यच्च लोके प्रकाशवत् ।
धनमित्युच्यते तच्च तेजसा जायते किल ॥ 222 ॥

मुक्ताफलं च यल्लोके पेयं क्षीरघृतादिकम् ।
रसादिकं च तत्सर्वं धनमित्युच्यते जनैः ॥ 223 ॥

अम्मयं तदिदं सर्वं यच्छ शोभनगन्धवत् ।
पुष्पं नानाविधं तच्च धनमित्युच्यते जनैः ॥ 224 ॥

श्वेतपीतारुणश्यामवर्णं नानाविधाम्बरम् ।
धनधान्यादि भूश्चेयं भूतयः किल देहिनाम् ॥ 225 ॥

मनोहराश्च वनिताः जनाश्च परिचारकाः ।
गृहसिंहासनाद्यं च सेना च चतुरङ्गिणी ॥ 226 ॥

इदं सर्वं च जगति महैश्वर्यमितीर्यते ।
पञ्चभूतात्मकं चेदं सर्वं सर्वस्य सम्मतम् ॥ 227 ॥

अहङ्कारमदक्रोधकामलोभादिरूपिणः ।
मनोविकारस्य यस्माद्धेतुभूतास्ततस्त्विमे ॥ 228 ॥

विकाराः पञ्चभूताख्या विकारा इति कीर्तिताः ।
दर्शन स्पर्शन आघ्राण श्रवण आस्वादनादयः ॥ 229 ॥

रमणालिङ्गनाद्याश्च विकाराः लोकसम्मताः ।
एकादेशेन्द्रियाण्येषां करणानि विदो विदुः ॥ 230 ॥

अतस्तयोर्मतैक्यं च युक्तमेवेति मे मतिः ।
तस्माद्भागवतार्थं च वेत्ति भागवतः पुमान् ॥ 231 ॥

इह चामुत्र च सुखं तस्यैवेत्यतिमङ्गळम् ।
सरस्वत्यास्तटे राजन् ऋषयः सत्रमासत ॥ 232 ॥

वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् ।
तज्ज्ञप्त्यै प्रेषयामासुः भृगुं ब्रह्मसुतं नृप ॥ 233 ॥

स्वानुभूतमशेषेण भृगुः समनुवर्णयत् ।
तच्छ्रुत्वा मुनयः सर्वे विस्मिताः छिन्नसंशयाः ॥ 234 ॥

भूयांसं श्रद्दधुर्विष्णुं यतः शान्तिर्यतोऽभयम् ।
इति भागवतोक्तेश्च मुनयः शंसितव्रताः ॥ 235 ॥

तपोमयक्रोधवशौ कृत्वा ब्रह्मशिवावधः ।
शान्तं नारायणं सर्वेश्वरं निर्णयन् किल ॥ 236 ॥

कस्तस्य समतामेति वदन्तु प्रतिवादिनः ।
तूर्णं गृहीत्वा पाणिभ्यां विषाणे तस्य नन्दिनः ॥ 237 ॥

स शूलपाणं चिक्षेप वैनतेयो धनुश्यतम् ।
आक्षिपत् किल यद्बाहः तार्क्ष्यः त्र्यक्षं धनुश्शते ॥ 238 ॥

कः समस्तस्य कृष्णस्य वदन्तु प्रतिवादिनः ।
तयाऽपहृतविज्ञानस्तत्कृतस्मरविह्वलः ॥ 239 ॥

भवीन्या अपि पश्यन्त्या गतह्रीः तत्पदं ययौ ।
तस्यासौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः ॥ 240 ॥

प्रत्यपद्यत कामेन वैरिणा च विनिर्जितः ।
इति भागवते स्पष्टं हरेर्नारायणीं तनुम् ॥ 241 ॥

दृष्ट्वा कामातरुः शम्भुः अभूदित्याह यच्छुकः ।
अतो हरभ्रान्तिकरमहाशक्तिमतः प्रभो ॥ 242 ॥

महाविष्णो समः कः स्याद्वदन्तु प्रतिवादिनः ।
युधिष्ठिरस्य यो यात्रां कुरुते स्तौति वन्दते ॥ 243 ॥

स कृष्णः तस्य किं दासो वदन्ति प्रतिवादिनः ।
यदीयं मर्त्यलोकेऽस्मिन् लीलामानुषवद्धरेः ॥ 244 ॥

तदा लीला कुतो नान्यद्वदन्तु प्रतिवादिनः ।
गोपीभिस्तोभितो नृत्यन् भगवान् बालवत् क्वचित् ॥ 245 ॥

उद्गायति क्वचित् मुग्धः तद्वशो दारुयन्त्रवत् ।
बिभर्ति क्वचिदाज्ञप्तः पीठकोन्मानपादुकान् ॥ 246 ॥

बाहुक्षेपं च कुरुते गोपीनां प्रीतिमावहन् ।
दर्शयन् तद्विदां लोक आत्मनो भक्तवश्यताम् ॥ 247 ॥

व्रजस्योद्वाहयन् हर्षं भगवान् बालचेष्टितैः ।
इति भागवते बाललीलाः पश्य रमापतेः ॥ 248 ॥

यो गोपीनां स्वभक्तानां पादुकां च स्वमूर्धनि ।
धत्ते विधत्ते च विभुः तदुक्तमखिलं किल ॥ 249 ॥

एतावतास्य किं नैच्यं वदन्तु प्रतिवादिनः ।
इत्थं लीला बहुविधाः कुर्वतो जगदीशितुः ॥ 250 ॥

लीलामध्यगतं मातृपितृदेवर्षपूजनम् ।
सन्ध्यावन्दननिद्रादिलोकपालाभिवन्दनम् ॥ 251 ॥

कथं लीलैव न भवेत् वदन्तु प्रतिवादिनः ।
गोपीनां पादुकाधारी कं कं नाराधयेत् हरिः ॥ 252 ॥

लीलेदं चेत् कथं नान्यत् वदन्तु प्रतिवादिनः ।
अवतारे पितॄन् देवान् ऋषीन् चाभ्यर्चयन् हरिः ॥ 253 ॥

मूलरूपी रमाहस्तलालिताङ्घ्रिसरोरुहः ।
श्वेतद्वीपे दिव्यरत्नमण्टपे सुरसेविते ॥ 254 ॥

शेषभोगाख्यशयनशाली नारायणः प्रभुः ।
चकार कस्य वा पूजां वदन्तु प्रतिवादिनः ॥ 255 ॥

इन्द्रादयो लोकपाला विरिञ्चभवसंयुताः ।
सगणास्सिद्धगन्धर्वा विद्याधरमहोरगाः ॥ 256 ॥

मुनयो यक्षरक्षांसि खगाः किन्नरचारणाः ।
राजानश्च समाहूताः राजमपत्न्यश्च सर्वशः ॥ 257 ॥

राजसूयं समीयुर्हि राज्ञः पाण्डुसुतस्य वै ।
इति श्रीमद्भागवते स्तुते धर्मसुतक्रतौ ॥ 258 ॥

अर्हति ह्यच्युतः श्रेष्ठं भगवान् सात्वतां पतिः ।
तस्मात् कृष्णाय महते दीयतां परमार्हणम् ॥ 259 ॥

इति तत्रैव सदसि सहदेवेन संस्तुतः ।
जग्राह यो ह्यग्रपूजां कृष्णो देवर्षिसन्निधौ ॥ 260 ॥

स सर्वेशो न किं सर्वे वदन्तु प्रतिवादिनः ।
वयं न तात प्रभवाम भूम्नो भवन्ति काले न भवन्ति हीदृशाः ।
यस्मिन् परेऽन्ये प्यजजीवकोशाः सहस्रशो यत्र वयं भ्रमामः ॥

इयं भागवते स्कन्दे नवमे वागुमापतेः ।
हरिचक्रात् भीतचेताः सुतं दुर्वाससं प्रति ।
वयं तव भयं हर्तुं तात न प्रभवामहे ॥ 262 ॥

स्वसुतेऽस्मिन्नतिस्नेहात् तातेत्याह त्रिलोचनः ।
यतो भूम्नः सर्वगुणैः पूर्णात् नारायणात् प्रभोः ॥ 263 ॥

ईदृशा ये मत्स्यदृशाः सुरा ब्रह्मपुरस्सराः ।
सृष्टिकाले तु सम्प्राप्ते भवन्त्यद्भुतकर्मणः ॥ 264 ॥

तथा संहृतिकाले तु न भवन्त्यस्य लीलये ।
मृता सन्त्रस्तदुदरं प्रविश्य किल शेरते ॥ 265 ॥

इदं तु नाद्भुतं तात अस्मत्तोऽन्येऽपि सहस्रशः ।
अजस्य ब्रह्मणो जीवकोशाः ब्रह्माण्डराशयः ॥ 266 ॥

यथा धनं कोशगृहे रक्षत्येवं महाप्रभुः ।
स्थितान् सत्यान् जीवगणान् अण्डान्तः किल रक्षति ॥ 267 ॥

तस्मादेते जीवकोशा इत्युच्यन्ते विवेकिभिः ।
अजस्य तेषु प्राधान्यात् उच्यन्ते ते तदीयकाः ॥ 268 ॥

सृष्टिकाले भवन्त्येते लये तु न भवन्ति च ।
कल्पेकल्पे तु सृष्टत्वात् सहस्रश इतीरितम् ॥ 269 ॥

यत्र येषु वयं सर्वे भ्रमामः स्वस्वकर्मणा ।
ईदृक् ब्रह्माण्डकोटीनां कर्तुः संहर्तुरीशितुः ॥ 270 ॥

तदन्तस्थास्मदादीनां सृष्टौ नष्टौ च का कथा ।
ईदृशश्च हरेश्चक्रं को वा देवो निवारयेत् ॥ 271 ॥

अतस्तमेव शरणं याहीत्याह किलेश्वरः ।
एवं च हरिणा साम्यमैक्यमाधिक्यमेव वा ॥ 272 ॥

कस्य वा स्यात अजाण्डान्तवर्दन्तु प्रतिवादिनः ।
एवं च यस्य रोमाधस्थितब्रह्माण्डकोणगाः ।
क्वेमे सुराः स विष्णुः क्व वदन्तु प्रतिवादिनः ॥ 273 ॥

एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः।
महानहं वैकृततामसेन्द्रियैः सृजामि सर्वं यदनुग्रहादिम् ॥ 274 ॥

आह चेत्थं भागवते पञ्चमस्कन्ध एव च ।
इलावृताख्यखण्डस्थः शशिखण्डधरो हरः ।
ब्रह्मवीन्द्रेद्रपूर्वाश्च वयं सर्वे सुरेश्वरा ॥ 275 ॥

महात्मनो यस्य वशे शकुन्ताः सूत्रयन्त्रिताः ।
यथा तथा स्थितास्तेन तस्यैवानुग्रहादिदम् ॥ 276 ॥

अहंकृतेस्त्रिभिर्भागैः देहेन्द्रियमनोमयान् ।
देवान् देवानुगान् पूर्वदेवभूदेवपूर्वकान् ॥ 277 ॥

जीवान् अजीवांश्च जडान् सृजामो न निजेच्छया ।
एवं च सूत्रकाराज्ञावशवर्तीशकुन्तवत् ॥ 278 ॥

हर्यधीनं हरेर्भिन्नं हृदिस्थहरिणेरितम् ।
चराचारात्मकं विश्वमिति वक्ति यतः शिवः ॥ 279 ॥

अतोऽग्रतो नः कस्तिष्ठेद्वदन्तु प्रतिवादिनः ।
इति स्पष्टं भागवते यः शिवः स्तौति केशवम्॥ 280 ॥

स कथं तस्य सदृशो वदन्तु प्रतिवादिनः ।
राज्ञामाज्ञा गुरूणां च नैवोल्लङ्घ्या यदा तदा॥ 281 ॥

राजराजेन वन्द्यस्य शिवस्य जगतुर्गुरोः।
आज्ञा सर्वैः किं न मान्या वदन्तु प्रतिवादिनः॥ 282 ॥

लिङ्गानुशासनमिदं लिङ्गे भक्तिं प्रकुर्वता ।
उल्लङ्घ्यमङ्गीकार्यं वा वदन्तु प्रतिवादिनः॥ 283 ॥

अहं भवो दक्षभृगुप्रधानाः प्रजेश भूतेश सुरेशमुख्याः ।
सर्वे वयं यन्नियमं प्रपन्नाः मूर्ध्न्यर्पितं लोकहितं वहामः॥ 284 ॥

स्थानं मदीयं सह विश्वमेतत् क्रीडावसाने द्विपरार्थसंज्ञे।
भ्रूभङ्गमात्रेण हि सन्धिधक्षोः कालात्मनो यस्य कतो भविष्यति॥

इत्याह नवमस्कन्धे ब्रह्मा दुर्वाससं प्रति ।
सत्यलोकेश्वरः सोऽहं ब्रह्मा कैलासगः शिवः॥ 286 ॥

दक्षाद्याश्च प्रजेशाख्याः कार्तवीर्यादयो नृपाः।

घण्टाकर्णादयः सर्वे भूतेश्चाश्च तथा सुराः ॥ 287 ॥

ईशा येषां मानुषाश्च इत्येवं सर्वे वयं क्रमात् ।
यस्याज्ञरूपनियमं प्रपन्नाः शरणागताः ॥ 288 ॥

मूर्ध्न्यर्पितं लोकहितं वहामः तद्रमापतेः ।
दासा एव वयं सर्वे न कोऽप्यत्येति तं प्रभुम् ॥ 289 ॥

किञ्चेशोऽसौ मम स्थानं सह विश्वं च लीलया ।
पराख्यस्वनिमेषान्ते भ्रूभङ्गे न दिधक्षति ॥ 290 ॥

ब्रह्मणस्त्वायुषोऽर्धं यत्तत्सरार्धपदोदितम् ।
पराभिधनिमेषस्य यतोऽर्धमभवद्धि तत् ॥ 291 ॥

द्विपरार्धं ब्रह्म सम्पूर्णायुः किल पराभिधम् ।
पञ्चाशब्दपर्यन्तं युवा ब्रह्मा ततः परम् ॥ 292 ॥

वृद्धश्चेति विभागस्य दर्शनाय विवेकिनः ।
द्विपरार्धाख्यया प्राहुः ते ब्रह्माऽपि तथोक्तवान् ॥ 293 ॥

विहाय लाघवं यस्मात् गौरवे त्वकरोन्मतिम् ।
प्रामाणिकं गौरवं च मानयन्ति यतो बुधाः ॥ 294 ॥

हरेश्चक्रमिदं तस्यैवाज्ञयाऽन्वगमन्मुनिम् ।
अतस्तदाज्ञाभङ्गो नस्तद्भृत्यानां न शोभते ॥ 295 ॥

स्वाज्ञोल्लङ्घनकर्तारं मां दिधक्षेदपि प्रभुः ।
कालात्मनस्तस्य चित्ते भविष्यत्कार्यमीशितुः ॥ 296 ॥

कः पश्यति ततो गच्छ तमेव शरणं प्रभुम् ।
एवं च ब्रह्म णो यस्मात् भयं यस्य च किङ्करा ॥ 297 ॥

ब्रह्माद्या विबुधाः सर्वे यदाज्ञाधारिणः सदा ।
कस्तस्य सदृशो देवो वदन्तु प्रतिवादिनः ॥ 298 ॥

कुशलार्थैकदक्षाख्यपदेनेन्द्रं भवादनु ।
सञ्जग्राह ततस्तारतम्यं चास्मद्गुरूदितम् ॥ 299 ॥

किं नाभूत् ब्रह्मणो हार्दं वदन्तु प्रतिवादिनः ।
सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ॥ 300 ॥

विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ।
स एव भगवान् लिङ्गैः त्रिभिरेतैरधोक्षजः ॥ 301 ॥

स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः ।
नमस्तस्मै भगवते वासुदेवाय वेधसे॥ 302 ॥

यन्मायया दुर्जयया मां ब्रुवन्ति जगद्गुरुम् ।
इति स्पष्टं भागवते सुतं प्रत्याह पद्मभूः ॥ 303 ॥

निमित्तमात्रमीशस्य विश्वसर्गनिरोधयोः ।
हिरण्यगर्भः शर्वश्च कालाख्यारूपिणस्तव॥ 304 ॥

यस्य प्रसादजो ब्रह्म रुद्रश्च क्रोदसम्भवः ।
गन्तव्यलीकैरजशं कराद्यैश्च प्रतर्क्यते॥ 305 ॥

तीर्थास्पदं शिवविरिञ्चनुतं ते पदाम्बुजम् ।
इति भागवते तत्र तत्र यस्तूयते हरिः ॥ 306 ॥

कस्तस्य सदृशो देवः वदन्तु प्रतिवादिनः ।
यः केशवः किल ब्रह्मरुद्राद्युत्कृष्टचेतनः ॥ 307 ॥

ब्रह्मेशाद्यानतेषीको यश्च शम्भोः पितामहः ।
दुर्वाससः पृष्ठलग्नं यच्चक्रं ब्रह्मशङ्करौ॥ 308 ॥

अभीषयत् कोऽस्य समो वदन्तु प्रतिवादिनः ।
असावेकार्णवीभूते मायावटजले पुमान्॥ 309 ॥

जगत् स्वजठरे भृत्वा तस्मिन् शेते जनार्दनः ।
आसीदेको ह वै चाग्रे विष्णुर्नारायणोऽव्ययः ॥ 310 ॥

न च ब्रह्मा च रुद्रश्च न देवा न महर्षयः ।
इति स्मृतेर्ब्रह्मलयेऽप्येको नारायणोऽखिलम्॥ 311 ॥

संहृत्य जठरे भृत्वा शेते वटपुटे किल ।
तदा न श्रूयते ब्रह्मा न रुद्रो नापरे सुराः ॥ 312 ॥

तस्य विष्णोः समः को वा वदन्तु प्रतिवादिनः ।
नारीसङ्गममत्तोऽसौ यस्मान्मामवमन्यते ॥ 313 ॥

योनिलिङ्गस्वरूपं वै तस्मादस्य भविष्यति ।
इति पाद्मपुराणोक्तेः शिवं पञ्चमुखं पुरा ॥ 314 ॥

यस्य भृत्यो भृगुः शप्त्वा योनिलिङ्गं व्याधात् शिवम् ।
यतो लिङ्गं गले सर्वे धारयन्ति शिवानुगाः ॥ 315 ॥

स्वलिङ्गमूलभूतेन भृगुणाऽपि हि योऽर्चितः ।
तस्य विष्णोः समः को वा वदन्तु प्रतिवादिनः ॥ 316 ॥

वम्रीरूपधरः शक्रः चिबुकाधः स्वलीलया ।
शिवेन स्थापितपिनाकस्य ज्यामाच्छिनत् किल ॥ 317 ॥

छिन्नज्येन स्वधनुषा छिन्ने च शिवमस्तके ।
प्रवर्ग्याभिधयाऽहुत्या हुत्वा श्रीविष्णुमव्ययम् ॥ 318 ॥

प्रतोष्य तस्य कृपया सुराः सर्वे पुनर्भुवि ।
पतितं तच्छिरः शम्भो कथं ते सन्दधुः किल ॥ 319 ॥

समोऽस्य स कथं शम्भो वदन्तु प्रतिवादिनः ।
पुराऽमरैः कृते यस्य यज्ञे पशुपतिः पशुः ॥ 320 ॥

इति पुंसूक्त एवोक्तं सर्वेषां सम्मतं किल ।
एवञ्च यज्ञकर्तारो ब्रह्माद्या वा मखे पशुः ॥ 321 ॥

शिवो वाऽथ हरिः पूज्यो वदन्तु प्रतिवादिनः ।
(शिवो वा हरिपूज्यः कः वदन्तु प्रतिवादिनः ) ॥ 322 ॥

यं विष्णुं हविषाऽभ्यर्च्य रुद्रो रौद्रपदं किल ।
लेभे स कस्य वा अर्च्यो न वदन्तु प्रतिवादिनः ॥ 323 ॥

आतनोमि धनुर्हन्तुं रुद्रं ब्रह्मद्विषं लये ॥ 324 ॥

यं रुद्रं कामये कर्तुं तं करोमि क्षणात् हरम् ।
मम योनिः समुद्रेऽन्तरिति यस्य वधूर्जगौ ॥ 325 ॥

हरेः तस्य समः कः स्यात् वदन्तु प्रतिवादिनः ।
इति युक्त्या श्रुतिशतैः यः स्मृत्या चार्चितोऽच्युतः ॥ 326 ॥

तस्याग्रे कः समः तिष्ठेत् वदन्तु प्रतिवादिनः ।
योऽसौ मन्दरधारेण छिन्नबाहूरुकन्धरान् ॥ 327 ॥

सुरान् सञ्जीवयामास तत्समोऽस्तीति को वदेत् ।
यश्च वामकरेणैव लीलयोद्धृत्य मन्दरम् ॥ 328 ॥

आरोप्य गरुडे प्राप तत्समोऽस्तीति को वदेत् ।
यश्च देवासुरकरोत्पतितं मन्दराचलम् ॥ 329 ॥

उद्दध्रे कूर्मरूपेण तत्समोऽस्तीति को वदेत् ।
यश्च नारायणी भूत्वा विमोह्यासुरमण्डलीम् ।
सुधामपाययद्देवान् तत्समोऽस्तीति को वदेत् ॥ 330 ॥

यश्चाशक्तान् सुरवरान् शक्त्याऽविश्य महाप्रभुः ।
चक्रशक्तियुतान् विष्णुः तत्समोऽस्तीति को वदेत्॥ 331 ॥

यं श्रीः स्वयंवरे देवान् धिक्कृत्य भवपूर्वकान् ।
वव्रे गुणाधिकं मत्वा तत्समोऽस्तीति को वदेत्॥ 332 ॥

इत्थं भागवते ग्रन्थे बहुधा बादरायणिः ।
उत्तमत्वेन यं स्तौति तत्समोऽस्तीति को वदेत्॥ 333 ॥

यं च सर्वेश्वरत्वेन सर्वज्ञत्वादिना जगौ ।
माण्डूकोपनिषद्विष्णुं तत्समोऽस्तीति को वदेत्॥ 334 ॥

बिभर्ति मस्तके यस्य पादतीर्थमहर्निशम् ।
स शम्भुस्तस्य कृष्णस्य पूजको नेति को वदेत्॥ 335 ॥

वाराणस्यां यस्य नाम जपन् अटति सन्ततम् ।
स शङ्करो रामपादकिङ्करो नेति को वदेत्॥ 336 ॥

इत्थं भगवतश्चित्रैः वचोभिश्च सुपेशलैः ॥ 337 ॥

भिन्नधीः विस्मृतः शीर्ष्णि स्वहस्तं कुमतिर्व्यधात् ।
मुमुचुः पुष्पवर्षाणि हते पापे वृकासुरे॥ 338 ॥

देवर्षिपितृगन्धर्वा मोचितः सङ्कटात् शिवः ।
इति भागवते स्पष्टमुक्तत्वाच्च सदाशिवः ॥ 339 ॥

भस्मासुरभयाद्भीतो यमाश्रित्य भयं जहौ ।
स श्रीकण्ठो विकुण्ठस्य किङ्करो नेति को वदेत् ॥ 340 ॥

यज्ञवास्तुगतं सर्वं उच्छिष्टं ऋषयः क्वचित् ।
चक्रुर्हि भागं रुद्राय स देवः सर्वमर्हति ॥ 341 ॥

इति भागवते यस्मात् मनुराह सुतं प्रति ।
तस्माद्यज्ञभुजो विष्णोरत्युच्छिष्टं हरः किल ॥ 342 ॥

ईदृशः शङ्करो विष्णुकिङ्करो नेति को वदेत् ।
अद्यापि रुद्रायोच्छिष्टाहुतिदाः श्रुतिकोविदाः ।
हस्तं प्रक्षालयन्त्येतदुच्छिष्टं नेति को वदेत् ॥ 343 ॥

दिगम्बरश्च जटलः तीर्थसेवी निरन्तरम् ।
भिक्षान्नभुक् चाक्षमालां बिभ्राणो व्याघ्रचर्मणि ।
उपविश्य जपन्मन्त्रं शिष्यायोपदिशन्मनुम् ॥ 344 ॥

तन्मन्त्रदेवतां ध्यायन् व्याख्याकाले च मालिकाम् ।
द्विगुणीकृत्य कर्णे वा कण्ठे वा धारयन् सदा ॥ 345 ॥

चरन् परमहंसो यः स गुरुर्नेति को वदेत् ।
तन्मन्त्रदेवतां तां तु देवो नेति च को वदेत् ॥ 346 ॥

एं च काश्यां सततं जपन् रामषडक्षरम् ।
ध्यायंश्च तं हृदि सदा तारकब्रह्मसंज्ञितम् ॥ 347 ॥

जपकाले तूपविष्टो भूमौ शार्दूलचर्मणि ।
आवर्तयन् स्फाटिकाक्षमालां दक्षकराङ्गुलौ ॥ 348 ॥

व्याख्याकाले च तां कर्णे द्विगुणीकृत्य धारयन् ।
दिगम्बरश्च जटिलः तीर्थशोभितमस्तकः ॥ 349 ॥

वीथ्यां वीथ्यामटश्चाम्पि सतां मन्त्रोपदित्सया ।
मृतिकाले विमुक्त्यर्थं कर्णे कर्णे जपन् मनुम् ॥ 350 ॥

ऊर्ध्विभवद्दक्षकर्णमाश्वचण्डालगर्दभम् ।
सर्वप्राणिषु चेत्थं यो गुरुरूपधरो हरः ॥ 351 ॥

पायं पायं श्रुतिपुटे रामानामामृतं तु यत् ।
ध्यायं ध्यायं मनसि तं तारकब्रह्मसंज्ञितम्॥ 352 ॥

जापं जापं कर्णमूले प्रकृतेर्विकृतौ नृणाम् ।
जटिलः सन्नटति कोऽपीत्यर्थप्रतिपादके॥ 353 ॥

काशीकाण्डस्थवचने श्रूयतेऽध्यापि यो हरः ।
स्पष्टं गुरोराकृतिमान् स गुरुर्नेति को वदेत्॥ 354 ॥

तद्रहस्य मनोरर्थभूतो नीलोत्पलप्रभः ।
रामो राजीवनेत्रो यः स देवो नेति को वदेत्॥ 355 ॥

पायं पायं श्रुतिचुलकितं रामनामामृतं यत् ।
ध्यायं ध्यां मनसि सततं ब्रह्मतत्तारकाख्यम् ।
जापं जापं प्रकृतिविकृतौ प्राणिनां कर्णमूले ।
वीथ्यां वीथ्यामटति जटलः कोऽपि काशीनिवासी॥ 356 ॥

इति श्लोकमिमं सर्वजनानामपि सम्मतम् ।
शैवानां च मतं लोके प्रख्यातं नेति को वदेत्॥ 357 ॥

सर्वेषामुपदेष्टारं गुरुमाहुर्यतोऽखिलाः ।
उपदेष्टमनोरर्थं द्वैवमाहुश्च यज्जनाः॥ 358 ॥

तत्सर्वसम्मतेर्थेऽस्मिन् संशयोऽस्तीति को वदेत् ।
कथां स्वस्याप्यभिमतां वदन्तं प्रति को वदेत् ॥ 359 ॥

विमतोऽसौ पुरहरो गुरुर्भवितुमर्हति ।
गुरुलक्षणपूर्णत्वात् यथाऽयं सम्मतो गुरुः ॥ 360 ॥

इति लिङ्गं च लिङ्गस्य गुरुतामनुमापयेत् ।
लिङ्गोक्तार्थे पक्षपातो न लिङ्गस्येति को वदेत् ॥ 361 ॥

गुरुलक्षणयुक्तोऽपि यदि न स्यात् गुरुर्हरः ।
तर्हि सम्प्रतिपन्नोऽपि गुरुर्न स्याद्गुरुस्तव ॥ 362 ॥

अनुकूलमिमं तर्कं गर्जन्तं प्रति को वदेत् ।
यमुद्दिश्य जगन्नाथं महेशोऽपि दिगम्बरः ॥ 363 ॥

जटी भस्मानुलिप्ताङ्गः तपस्वी वीक्षितो जनैः ।
ततोऽधिकोऽस्ति को देवो लक्ष्मीकान्तन्मधुद्विषः ॥ 364 ॥

यत्तत्वं चिन्त्यते नित्यं त्वया योगेश्वरेण हि ।
इति गौरीवाक्यमूलं अनुमानमिदं मम ॥ 365 ॥

तस्मात् स्मार्तानुमानस्य प्रत्यर्थिभूय को वदेत् ।
स्मृत्यर्थस्य परित्यागे च स्मार्त इति को वदेत्॥ 366 ॥

हरिः स्वनाभिपद्मस्थब्रह्मणे मूलरूपतः ।
समस्तवेदोपनिषत्पञ्चरात्रादिकां स्वकाम्॥ 367 ॥

विद्यामुपदिशन् तस्मै परान्ते च परां गतिम् ।
दिशन् ब्रह्मगुरुः ब्रह्मपिता सर्वस्य तस्य च॥ 368 ॥

इष्टं मोक्षं दिशन्निष्टं दैवं नेति च को वदेत् ।
अवतारेऽपि रामो यः तारकब्रह्मसंज्ञितः॥ 369 ॥

ब्रह्मलोकाप्तचण्डालाद्यशेषप्राणि सार्थपः ।
स्वर्णीतगर्दभाश्वादिः सर्वाभीष्टमहाफलम् ।
परं धाम नयन्निष्टं दैवं नेति च को वदेत्॥ 370 ॥

'आरोग्यं भास्करादिच्छेत् भूतिमिच्छेत् हुताशनात् ।
ज्ञानं (विद्या) महेश्वरादिच्छेत् मोक्षमिच्छेत् जनार्दनात्॥ 371

इति स्मृतिश्च गर्जन्ती शिवं ज्ञानप्रदं सताम् ।
यतः प्राह ततश्चासौ गुरुर्नेति च को वदेत्॥ 372 ॥

मुकुन्दः सर्वजगतां मोक्षदातेति च स्मृतिः ।
यस्मात्प्राह ततो विष्णुर्दैवं नेति च को वदेत्॥ 373 ॥

यतो ज्ञानोपदेष्टाऽभूत् शिवः सर्वप्रकारतः ।
यतश्च मोक्षदाताऽभूत् हरिः सर्वप्रकारतः ।
अत ईदृक् शिवो देव इति कः कोविदो वदेत्॥ 374 ॥

शिवमन्त्रस्य यो देवः स देवो नेति को वदेत् ।
यत्पुत्रस्य विधे फालात्स्त्रागासीद्वैत्रिलोचनः ॥ 375 ॥

पितामहस्य स हरेः कथं नाराधको वद ॥ 376 ॥

इलावृते किल शिवो विष्णुं सङ्कर्षणाभिधम् ।
अद्याप्यर्चयतीदृक् स तस्य दासो न किं वद ॥ 377 ॥

'मां विधत्तेऽभिधत्ते मां विकल्प्योऽपोह्य इत्यहम् ।
इत्यस्या हृदयं साक्षात् नान्यो मद्वेद कश्चन।
इति स्मृतेः श्रौतसर्वानामानि जगुरच्युतम् ।
तन्नामधारकाः सर्वे ब्रह्मरुद्रादयः सुरा ॥ 378 ॥

दासा एवाभवन्यस्य तस्य कः सदृशो वद।
व्योमकेशस्य शिरसि सदा विष्णुपदं न किम्॥ 379 ॥

अतः कोशज्ञसम्मत्या शिवो दासो न किं वद ।
गङ्गाधरः किल शिवो गङ्गा विष्णुपदी किल ॥ 380 ॥

अतोऽपीशः कोशमते विष्णोर्दासो न किं वद ।
अतः श्रुतिविदां युक्तिस्मृतिकोशविदां सताम् ॥ 381 ॥

सभाङ्गणे शुभा नृत्येदियं सत्कृतिनर्तकी ।
सत्यं वेदेति यद्वाणि शास्ति शिष्टान् पुरातनी ॥ 382 ॥

तत्सत्यं वद नासत्यं वद मानोदितं वद ।
सतो मानस्य यद्योग्यं तद्धि सत्यं विदुर्बुधाः ॥ 383 ॥

तद्विरुद्धमसत्यं यत्तद्विष्णोर्न समं वद ।
किन्तूक्तमानसिद्धत्वात् विष्णुं सर्वेश्वरं वद ॥ 384 ॥

प्रमाणशतसिद्धत्वात् पुनः पुनरिदं वद ।
विष्णोः सर्वोत्तमत्वं यत्तदेवानुदिनं वद ॥ 385 ॥

शिवाज्ञया वादिराजः शिवादीनामनुग्रहात् ।
हरिभक्तिलतापुष्ट्यै चकार कवितामृतम् ॥ 386 ॥

वादिराजार्द्रहृद्वापीतटाकाङ्कुरिता त्वियम् ।
हरिभक्तिलता कृष्णतरोः पादेऽर्पितैधताम् ॥ 387 ॥

नवरत्नप्रभाभासं नमतामभिलेष्टदम् ।
इन्दिरानन्दकं कृष्णवृन्दारकतरुं श्रये ॥ 388 ॥

तद्वादिराजहृद्वापीमारभ्याच्युतमूर्धनि ।
स्थिता मुक्तिपुरीपर्यन्तं च येयं लतोद्गता ॥ 389 ॥

सन्तोऽस्त्यन्तः फलान्यस्याः सन्ततान्यन्तरान्तरा ।
आरोहन्तु लतामेतामालम्ब्यान्ते हरेः पुरीम् ॥ 390 ॥

अनेन प्रीयतां श्रीशः प्रीयेतां वाण्युमापती ।
सुराः सदाराः प्रीयन्तां अनुगृह्णन्तु नः सदा ॥ 391 ॥

वादिराजमुनीन्द्रेण कृता सुजनसम्मता ।
हरिभक्तिलताऽसूत तृतीयां मञ्जरीमिमाम् ॥ 392 ॥

इति श्रीमत्कविकुलतिलक श्रीमद्वादिराजपूज्यचरण विरचिता हरिभक्तिलता समाप्ताः ॥

गुरुमखिलगुणज्ञं सद्गुणैकाधिवासं
शमदम परिनिष्ठं सत्यनिष्ठं वरिष्टम् ।
सकलसुजन शिष्ठं नित्यनिर्धूतकष्टं
हयमुखपदनिष्ठं मां भजन्तु प्रपन्नाः ॥

।। श्रीलक्ष्मी हयग्रीवार्पणमस्तु ॥